जङ्गमञ्चैव सर्वं प्राणस्य भोजनमिति” मनुना जङ्गमस्याप्यन्नत्वोक्तेः ।

**अन्नकिट्ट** न० ६त० । अन्नपाकशब्दे वक्ष्यमाणे अन्नमलभेदे ।

**अन्नकोष्ठ** पु० अन्नस्य ब्रीह्यादेः खलं कोष्ठमिव अल्पार्थे कन् । (कुटी) इति ख्याते धान्यादेः स्थापनस्थाने ।

**अन्नद** त्रि० अन्नं ददाति दा—क । अन्नदातरि “वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नद” इति मनुः । अन्नपूर्णाख्यदेवीभेदे स्त्री तत्पूजादि अन्नदाकल्पग्रन्थे दृश्यम् ।

**अन्नदास** पु० अन्नेन पालितो दासः । अन्नमात्रलाभेन प्राप्तदासत्वे भक्तदासे (पेटभाता) अन्नस्य दासमात्रे च, “अन्नस्य पुरुषो दास” इति भारते पुरुषस्य अन्नहेतुनैव दासत्वोक्तेः ।

**अन्नदोष** पु० अन्नस्य भोजनप्रतिग्रहादिकृतः दोषः पापविशेषः धातुवैषम्यं वा । अभक्ष्यान्नभक्षणजनिते अग्राह्यान्नप्रतिग्रहजनिते च पापहेतौ अपथ्यभोजनजधातुवैषम्यकृते च दोषभेदे “आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति” मनुः । अभक्ष्याण्यन्नानि द्विविधानि स्मृत्यादौ निषिद्धतया उक्तानि, तानि च अभक्ष्यशब्दे वक्ष्यन्ते । वैद्यके रोगनिदानतया उक्तानि च, तानि धातुवैषम्यसम्पादनद्वारा रोगनिदानतया वैद्यके प्रसिद्धानि यथा मन्दाग्नेः गुर्वन्नादीनि ।

**अन्नपाक** पु० ६त० । अन्नस्य ब्रीह्यादेर्लौकिकदहनेन विक्लित्यनुकूलव्यापाररूपे पचने, भुक्तान्नस्य जठरानलेन रसरक्तादिरूपान्तरापादने च तत्र लौकिकपाकः चुल्ल्युपरिस्थापनपूर्व्वाधःसन्तापनादिर्लोकसिद्धः । जाठरपाको यथा पदार्थादर्शे योगार्णवे । “आयुष्यं भुक्तमाहारं स वायुः कुरुते द्विधा संप्रविश्यान्नमध्यन्तु पृथक् किट्टं पृथग्जलम् । अग्नेरूर्द्ध्वं जलं स्थाप्य तदन्नं च जलोपरि । जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः । वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम् । अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः । द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग्जलम् । रसेन तेन ता नाडीः प्राणः पूरयते पुनः । प्रतर्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः । रसः स नाडीमध्यस्थः शरीरे चोष्मणा भृशम् । पच्यते पच्यमानस्तु भवेत् पाकद्वयं पुनः । चर्म्माविष्ट्य समन्ताच्च रुधिरञ्च प्रजायते” इति त्वगादिधातुपाकस्तु ४९ पृष्ठे उक्तः ।

**अन्नपान** न० अन्नस्य अभ्यवहार्य्यमात्रस्य पानसुगभोगः । खादनीयादिभक्षणे, “अथातोऽन्नपानविविधाध्यायं व्याख्यास्याम” इति प्रतिज्ञाय “तस्याशितपीतलीढखादितस्य नानाद्रव्यात्मकस्येति” सुश्रुते उक्तत्वात् सर्व्वेषामन्नपानत्वम् ।

**अन्नपूर्णा** अन्नं पूर्णं यया । देवीभेदे “अन्नपूर्णे ! सदापूर्णे ! शङ्कर प्राणवल्लभे ! । ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां मे देहि पार्व्वतीति, शङ्कराचार्य्यः । एषा च काशीश्वरगृहिणी काशीखण्डे एतस्याभूरिशो वर्णनम् ।

**अन्नपूर्णेश्वरी** स्त्री भैरवीभेदे तन्त्रसारेऽस्या विवरणम् । अन्नपूर्णायामपि “भिक्षां देहि कृपावलोकनकरी मातान्नपूर्णेश्वरीति” शङ्कराचार्य्यः ।

**अन्नप्राशन** न० प्रकृष्टं विधानेन प्रथममाशनं प्राशनं ६त० । षष्ठाष्टममासादौ बालकादेर्विधानेन प्रथममन्नभोजने । “षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले” इति मनुः । “ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि । “अष्टमे वास्य कर्त्तव्यं यद्वेष्टं मङ्गलं कुले” इति स्मृत्यन्तरम् । षष्ठ इति मुख्यकल्प इति रघु० । तत्रायं विशेषः कृत्यचिन्तामणौ । “अन्नस्य प्राशनं कार्य्यं मासि षष्ठेऽष्टमे बुधैः स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ” मुनिः । तत्र विहिततिथ्यादि यथा

“षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णेतरे । प्राजेशादितिपौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरैराग्नेयाप्यपितृपैत्रभैश्च नितरामन्नादिभक्षः शुभ इति, भुज० भी० । प्राजेशादयश्च रोहिण्यादयः ४,५,७,८,२७,१,२२,२३,१३,१४,१५,१६,१७,१८,१२, २१,२६,३,२०,१०, । तथाचैतन्निताति नक्षत्राणि तत्र । विहितानि । तत्र वर्ज्यानि । “द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्वसु । बलमायुर्यशोहन्यात् शिशूनामन्नभक्षणम् । कृत्यचि० । “वेधं सर्वत्र वर्ज्जयेदिति कृतेर्नक्षत्रवेधस्यापि तत्र वर्ज्यता ।

**अन्नभक्त** त्रि० अन्नार्थं भक्तः दासः । अन्नमात्रदानेन प्रतिपादिते दासभेदे भक्तदासे विवृतिरस्य दासशब्दे दृश्या ।

**अन्नमय** पु० अन्नस्य विकारः अन्न+विकारार्थे मयट् । स्थूलशरीरे । स्थूलशरीरस्य अन्नविकारत्वादन्नमयत्वम् अतएवोक्तम्, “पितृभुक्तान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते, देहः सोऽन्नमयोनात्मा प्राक् चोर्द्धं तदभावत इति” दृङ्गोक्तिः “स वा एष पुरुषोऽन्नरस” इति श्रुतौ अन्नरसत्वोक्तेस्तस्य अन्नमयत्वम् । “अन्नाद्रेतः रेतसः पुरुषः” इति श्रुतौ च देहस्यान्नमयत्वे प्रकारोदर्शितः ॥ अन्नविकृतिमात्रे त्रि० । “अन्नमयं